UNIVERSAL
LIBRARY

OU_182777

UNIVERSAL
LIBRARY

OSMANIA UNIVERSITY LIBRARY

OUP—730—28-4-81—10,000.

OSMANIA UNIVERSITY LIBRARY

Call No. H641.1 R14B Accession No. G.S. 256

Author रघुनाथ .

Title भोजनकुतूहलम् - 1956. प्रथमोभागः

This book should be returned on or before the date last marked below

अनन्तशयनविश्वविद्यालयः

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः १७८.

श्रीरघुनाथविरचितं

# भोजनकुतूहलम् ।

(प्रथमो भागः)

प्रकाशकः

शूरनाद् कुञ्जन् पिळ्ळ एं. ए.

पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः ।

---

अनन्तशयनस्थ-

सांस्थानिकमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितम् ।

൧൯൫൬/൧൧൩൧

[मूल्यं सार्धं रूप्यकद्वयम्]

# PREFACE

Bhōjana Kutūhala, the present publication, is a work of very great value, both as a treatise on dietetics and as a work bearing on some aspects of Āyurveda. It contains invaluable information about several articles of food, and incidentally the diet that was prevalent during the period, *viz* 17th century. A perusal of the contents of the book will convince any one of the importance of this work.

Its author is Raghunātha Gaṇeśa Navahasta, a Mahrāṭṭa scholar who flourished in the 17th century A D. He was a friend of saint Rāmdās and enjoyed the patronage of Queen Dīpa Bai, wife of Ekoji Bhose of Tanjore. A few facts about his life and works are given in the succeeding Note

We have in our collection two manuscripts (Nos. P I No 1020 and 1021) of the treatise, and in view of the importance of the work, we took up the responsibility to bring out an edition In editing the work we have taken advantage of collating our manuscripts with the manuscripts of the Sarasvatimahal Library, Tanjore, and the Research Institute, Poona.

Our thanks are due to the authorities of the Sarasvathīmahal Library, Tanjore and Bhandarkar Oriental Research Institute, Poona. We are grateful to Prof: P. K. Gode of the Research Institute, Poona, for his good offices in securing a manuscript. We have also been greatly benefited by his contributions on Raghunātha in the issues of the Journal of the University of Bombay, September 1491, September 1944 etc. The late Pandit R. Ananthāchār and Sri M. Madhavan Unni of this Library attended to the scrutiny of the manuscript

The succeeding volumes of the work will be published without delay.

1081

The present edition is based on the following manuscripts.

P 1. Palm leaf MS No 1020 written in Grantha script belonging to the Maharaja's Palace Library, Trivandrum.

P 2. Palm leaf MS. No 1021 in Grantha characters from the same source

T 1. A paper MS. in Devanāgarī character supplied by the Sarasvatimahal Library, Tanjore.

T 2. A paper MS. in Devanāgarī character procured from the same source containing a statement that the MS. belonged to Maharaja Tulaja Bhonsle

B h. A paper MS. in Devanāgarī script procured from the Bhandarkar Oriental Research Institute, Poona.

J 1. A paper MS. in the possession of Sri Babu Saheb Sankar Rao Jagtap of Kolhapur, containing a statement that the MS. belonged to Samiji Nayak Punde. This MS. was procured through the kind offices of Prof. P. K. Gode, who has proved this to have been written sometime between 1650 and 1685 A. D

University MSS Library, Trivandrum, 1-5-1955.

SURANAD KUNJAN PILLAI,
*Honorary Director.*

# A NOTE ON BHŌJANAKUTŪHALA

The Bhōjanakutūhala is a rare and valuable work compiled from various sources by Sri Raghunātha Sūri. The name Bhōjanakutūhala (curiosity for food) is appropriate for this work, as it deals with the characteristics, method of preparation, purification etc. of the dietetic materials. The work is in three parts, the present publication being the first part. This part deals with the properties of the different food materials (such as grains like wheat and paddy, liquids like milk and curd), the methods of preparing different dishes, and their digestive effects. In the two succeeding parts are discussed the subjects of edibles and non-edibles, purification of food etc.

The work draws its material from old treatises like Suśruta, Bhāvaprakāśa, Manusmṛti and Vātsyāyana Sūtra. This has been stated by the author himself in the following verses:

" इत्थं विमथ्य गुणपाठसुधाम्बुराशिं
लब्ध्वा परामृतरसं सुरसं च तस्मात् ।
निरमायि भोजनकुतूहलमीश्वराणां
तोषाय तेन परितुष्यतु शेषशायी ॥

इति विविधनिबन्धाब्धीनगाधान् विगाह्य
प्रबलगुरुसमीक्षानौकया निर्विशेषम् ।
रुचिरतरललामग्राममासाद्य तत्तद्-
विहितविधि विधेयं सम्भृतं भूतयेऽस्तु ॥'

From the colophon इति श्रीमद्विद्वद्वृन्दपादारविन्दश्रीमदनन्तदेवोदयस्य श्रीरघुनाथविदुषः कृतौ भोजनकुतूहले द्रव्यगुणागुणकथनं नाम प्रथमः परिच्छेदः, and from the śloka:

संसेविता न गुरवस्तरवश्च दृष्टा
यैर्न क्षितौ जनपदेषु च तेषु तेषु ।

1081|V

भैषज्यतन्त्रमपि नैव कृतं स्वतन्त्रं
तेषां कृतेऽपि च कृतं रघुनाथनाम्ना ॥

etc, we know that the author of the work is Raghunātha Sūri. From the colophon of another work of this author by name Prayogaratnabhūṣa 'इति श्रीमद्धरिहरभट्टात्मजरघुनाथसुतगणेशभट्टतनुज ............ देवीयरघुनाथोन्नीतकृतौ श्रौतप्रयोगरत्नभूषायां पुण्याहवाचनादिपिण्डापितृयज्ञान्तो रत्नगुच्छः', it is seen that this Raghunātha was the son of Gaṇeśabhaṭṭa, grandson of Raghunātha and great-grandson of Harihara Bhaṭṭa, though there is a lacuna between गणेशभट्टतनुज and रघुनाथोन्नीत in the manuscript. There are several statements in the works of the author to the effect that he belonged to Anantadeva, for *eg.* अनन्तदेवीय, अनन्तदेवोदय, अनन्तदेवदयोदय, अनन्तदेवदयात्मज. These, especially अनन्तदेवदयात्मज would seem to indicate that the author's father was Anantadeva. But this is in contradiction to the statement noticed above. Moreover, Anantadeva is frequently spoken of by the author as his Guru and the son of Āpadeva and grandson of Anantadeva.* Anantadeva therefore, cannot be the author's father; he was in all possibility his Guru, and the statements may be taken as indicative of his extreme regard for him.

From certain letters of Saint Rāmdas addressed to Raghunātha† we know that he belonged to the Vasiṣṭha

* "अवादीत्थमनन्तेन गुरुणा करुणाब्धिना ।"

"इति श्रीमत्सकलभूमण्डलमण्डनायमानश्रीमदनन्तदेवात्मज-श्रीमदापदेव-तत्सुत-श्रीमदनन्तदेवदयोदयस्य रघुनाथविदुषः कृतौ धर्मामृतमहोदधिनिबन्धने गोदानविधिः"

इति श्रीमद्गिरिधिवेलावलयितेलावलयवर्ति-विद्वन्मण्डलीमण्डनायमान-श्रीमदनन्तदेवोदयस्य रघुनाथविदुषः कृतौ प्रायश्चित्तकुतूहले ......" etc.

† Vide P. K. Gode's paper 'The identification of Raghunatha' in the Journal of the Sarasvatimahal Library, Tanjore. (Vol. III, No. 1.)

gōtra and to the Karhade sect among the Mahrāṭṭas. His family surname was 'Navahasta' (corrupted in popular tongue as Navatha and Navathye) as can be gathered from the colophons in some of his works like इति ....... चातुर्मास्यप्रयोगो रघुनाथनवहस्तकृतः and नवहस्तरघुनाथभट्टविरचित- प्रायश्चित्तप्रकरणं समाप्तम् । In his Prāyaścittakutūhala, Raghunātha speaks of God Viṣṇu as his family deity:

अनेन प्रीयतां देवो भगवान् कमलापतिः ।
श्रीमदनन्तः पूर्वेषामस्माकं कुलदैवतम् ॥

Raghunātha's teacher Anantadeva whose genealogy we noticed above is believed to have lived between 1625 and 1675 A D. He was a versatile scholar and prolific writer and was a descendant of the great Mahrātta Saint Ekanātha. His father Āpadeva was the famous author of the Mīmāṁsānyāyaprakāśa.

Raghunātha was intimately associated with the Mahrātta Saint Rāmdas, the preceptor of Śivāji the Great. He was for a long time put in charge of the temple of Raghupati, built by the Saint at Chafol on the Man, a tributary of the river Kṛṣṇa

The author appears to have settled at Tanjore when a Mahrāṭṭa kingdom was established there in 1678 by Ekoji, for in some of his Mahrātti works like the Narakavarṇana he speaks of Dīpāmbikā, Queen of Ekoji as his patroness.

Besides the Bhojanakutūhala Raghunātha has written several other works in Sanskrit and Mahrāṭṭi. Among the Sanskrit works may be mentioned the following: —

1. Sāhityakutūhala — a work on Citrakāvya mentioned in the Narakavarṇana of the author, but no MS is known.

2 Prāyaścittakutūhala — on expiatory rites·

3 Janārdanamahodaya — a manual on Vaiṣṇava ritual and worship

4 Dharmāmṛtamahodadhi — an extensive compilation on religious and social law and customs

5 Kāsīmīmāṁsā — No MS· is known·

6· Prayogaratnabhūṣā — an exhaustive work on Vedic ritual·

7 Cāturmāsyaprayoga — on the Vedic ritual pertaining to the Cāturmasya sacrifices

Among the Mahrāṭṭi works may be mentioned the following:—

1 Narakavarṇana·

2 Govardhanoddhāraṇa

3· Strīdharma

In the Narakavarṇana mention is made of all the works except Prayogaratnabhūṣā and Caturmāsyaprayoga· These two as also some of the other works are mentioned by the author in certain other works like the Prāyaścittakutūhala *

---

* "अतश्च न शाकव्रतादौ द्रव्यमात्रत्यागः इत्यस्मत्कृतजनार्दनमहोदये विस्तरेण प्रपञ्चितम् ।" (भोजनकुतूहलम् )

"एवं भोजनविषये विशेषप्रायश्चित्तानि विशेषतो भोजनकुतूहले निरूपितान्यस्माभिस्तत एवावगन्तव्यानि ग्रन्थगौरवभयान्नात्र निरूपितानि ।

"तस्याः प्रयोगः प्रामकाले दर्शपूर्णमासयोरनारम्भनिमित्तं क्रियमाणाग्निभ्रष्टेष्ट्यर्थम् अन्वारम्भणीयेष्ट्या यक्ष्य इति सङ्कल्प्यास्मत्कृतप्रयोगरत्नभूषायां दर्शपूर्णमासप्रकरणे गोचर इति नेह पुनर्लिखितः"

पक्षहोमविधिश्चास्मत्कृतहोमप्रयोगे द्रष्टव्यः । Homaprayoga may probably be the Caturmasyaprayoga.

(प्रायश्चित्तकुतूहलम् )

or MS· of the works of Raghunātha vide 'Raghunātha and his works in the Journal of the Bombay University. (Vol. x. 1941)

A manuscript of Prayogaratnabhūṣa dated Śaka 1600 (1678 A. D.) is stated to be available in the Oriental Institute, Baroda. Prof. Gode speaks of a manuscript of Bhojanakutūhala produced about 1682.* This gives some clue to fix his period. Ekoji, the husband of his patroness Dīpa Bai reigned between 1676 and 1683. The Dharmāmṛtamahodadhi contains a chronogram giving the date of its composition to be Śaka 1623 (1701 A. D.). † The literary activity of Raghunātha may therefore be assigned to the period 1650 to 1725 A. D.

University MSS Library,
Trivandrum.

K. S. MAHADEVA SASTRI,
*Curator.*

---

* Contemporary MS. of Bhojanakutūhala by P. K. Gode in the Bombay University Journal Volume XIII.

† वह्नियुग्मरसचन्द्र(१६२३)सम्मिते शालिवाहनशके वृषाह्वये ।
वत्सरे तपसि कुम्भगे रवौ शूलिनः प्रियतिथौ महाव्रते ।
साम्बमीशमभिपूज्य तत्पदे वाक्प्रसूनाञ्जलिरसौ समर्पितः ।
तेन तुष्यतु स भक्तवत्सलः कोसलाधिपसुतासुतो हरिः ।

॥ श्रीः ॥

रघुनाथसूरिविरचितं

# भोजनकुतूहलम् ।

## प्रथमपरिच्छेदः ।

नमः प्रचण्डवेतण्डतुण्डाय मृडसूनवे ।
प्रत्यूहतिमिरध्वंससमुद्यत्करभानवे ॥

तस्मै नमः परानन्दमकरन्दरसाप्तये ।
श्रीगुरोः पादपद्माय यत्र मे निश्चलं मनः ॥

नत्वा तत्त्वविदो मुनिमुख्यान्
धन्वन्तरिमुखभोज्यगुणज्ञान् ।
भोजनकौतूहलमथ तन्वे-
ऽनेन जनो निपुणो मुदमीयात् ॥

### अथ भोजनविधिः ॥

तत्र— 'जीर्णे मितं हितं चाद्यात्' इत्यायुर्वेदोपदेशात् ,

भोक्तव्यं सघृतं सोष्णं हितं पथ्यं मितं तथा ।

इति व्यासस्मरणाच्च भोजनद्रव्याणि तद्गुणाश्चाभिधीयन्ते ।

तत्र धान्यप्रकरणम् । तच्च त्रिविधम् । तदुक्तं निघण्टुराजे—

धान्यं भोज्यं च भोगार्हमनघं जीवसाधनम् ।

---

१. $P_1$. $P_2$. तन्वे तेन

२. Bh. reads: तदुक्तं — धान्यं भोग्यं च भोगाय्यायुपजीवनं भोगार्ह-मनघं जीवसाधनम् । तच्च तावत् त्रिविधं ज्ञेयं शूकशिम्बीतृणाह्वयम् । 'ओषधीभ्योऽन्नम् अन्नात् पुरुषः' इति श्रुतेः । यवादि चणकादीनि वा । राजनिघण्टौ—व्रीह्यादिकं etc

[1]वृद्ध्याद्युपजीवनं भोगः जीवमाधनं, 'ओषधीभ्योऽन्नम् । अन्नात्पुरुषः ।' इति श्रुतेः ।

तच्च तावत्त्रिधा ज्ञेयं शूकशिम्बीतृणाह्वयम् ।'

व्रीह्यादिकं यदिह शूकसमन्वितं स्यात्
तच्छूकधान्यमथ[2] मुद्गमकुष्ठकादि ।
शिम्बीनिगूढमिति तत् प्रवदन्ति शिम्बी-
धान्यं तृणोद्भवमथो तृणधान्यमाहुः[3] ॥

इति । तत्र—

शूकोद्भवं लघु बलातिशयप्रदायि
मेध्यं त्रिदोषशमनं रुचिवीर्यकारि ।
शिम्बीभवं गुरु हिमं च विबन्धकारि
तद्वातलं तु शिशिरं तृणधान्यमाहुः ॥

[4]गुरु दुर्जरम् । उक्तं च भावप्रकाशे—

मन्दानलो नरो द्रव्यं मात्रागुरु विवर्जयेत् ।
स्वभावतश्च गुरु यत् तथा संस्कारतो गुरु ॥
मात्रागुरु तु मुद्गादि माषादिः प्रकृतेर्गुरुः ।
संस्कारगुरु पिष्टान्नं प्रोक्तमित्युपलक्षणम् ॥ इति ।

अथ शालिसामान्यगुणाः —

शालयो मधुरा स्निग्धा बल्या बद्धाल्पवर्चसः ।
कषाया लघवो रुच्याः स्वर्या वृष्याश्च बृंहणाः ॥
अल्पानिलकफाश्शीताः पित्तघ्ना मूत्रलास्तथा ।
शालयो दग्धमृज्जाताः कषाया लघुपाकिनः ॥
सृष्टमूत्रपुरीषाश्च रूक्षाः श्लेष्मापकर्षकाः ।
कैदारा वातपित्तघ्ना गुरवः कफशुक्रलाः ॥

---

१. J1. omits 'वृद्ध्याद्यु...... इति श्रुतेः'
२. Bh. धान्यमपि
३. J1. मन्यत
४. J1. गुरु, दुर्जरम् । ......मित्युपलक्षणम् । इति

कषाया अल्पवर्चस्का मधुराश्च बलावहाः ॥

कृष्टक्षेत्रे केदारे उप्तानामेते गुणाः —

स्थलजास्स्वादवः पित्तकफघ्ना वातवह्निदाः ।
किञ्चित्तिक्ताः कषायाश्च विपाके कटुका अपि ॥

स्थलभूमौ अकृष्टक्षेत्रे स्वयमुत्पन्नानामेते गुणाः —

वापिता मधुरा वृष्या बल्याः पित्तप्रणाशनाः ।
श्लेष्मलाश्चाल्पवर्चस्काः कषाया गुरवो हिमाः ॥

कृष्टक्षेत्रे अकृष्टक्षेत्रे च वापितानामेते गुणाः —

रोपितास्तु नवा वृष्याः पुराणा लघवस्स्मृताः ।
रोपितारोपिता भूयश्शीघ्रपाका गुणाधिकाः ॥

छिन्नरूढाः हिमा रूक्षा बल्याः पित्तकफापहाः ।
बद्धविट्काः कषायाश्च लघवश्चाल्पतिक्तकाः ॥

अथ शालिविशेषगुणाः । राजनिघण्टौ —

[1]राजान्नं तु त्रिदोषघ्नं सुस्निग्धं मधुरं लघु ।
[2]दीपनं बलकृत्पथ्यं कान्तिदं वीर्यवर्धनम् ॥

महाराष्ट्रेषु [3]रायभोगः इति; राजान्नमित्येवान्ध्रेषु[4] प्रसिद्धम् । राजनिघण्टौ—

कृष्णशालिस्त्रिदोषघ्नो मधुरः पुष्टिवर्धनः ।
वर्णकान्तिकरो बल्यो दाहजिद्वीर्यवर्धनः ॥

कृष्णशालिर्[5]गोदातीरे प्रसिद्धः । राजनिघण्टौ —

रक्तशालिस्तु मधुरो लघुः स्निग्धो बलावहः ।
रुचिकृद्दीपनः पथ्यः पित्तदाहानिलास्रजित् ॥

---

१. Bh. राजोदनं त्रिदोषघ्नं
२. $P_1$. दीपनं जीवितं पथ्यं
३. $P_1$. $P_2$. राजभोगः
४. Bh. मिति वाऽऽन्ध्रेषु
५. $J^1$. गोदावरीतीरे

तथा—

रक्तशालिर्वरस्तेषु[1] बल्यो वर्ण्यस्त्रिदोषजित् ।
चक्षुष्यो मूत्रलः स्वर्यः शुक्रलस्तृड्ज्वरापहः ॥

राजनिघण्टौ[2]—

विषव्रणश्वासकासदाहनुद्वह्निपुष्टिदः ।
मुण्डशालिस्त्रिदोषघ्नो मधुराम्लो बलप्रदः ॥

रुचिकृद्दीपनः पथ्यो मुखजाड्यरुजापहः ।

निःशूको मुण्डशालिः ।

राजनिघण्टौ[3]—

महाशालिः स्वादुर्मधुरशिशिरः पित्तशमनो
ज्वरं जीर्णं दाहं जठररुजमह्वाय[4] शमयेत् ।
शिशूनां यूनां वा यदतिजरसां वा हितकरः
सदा सेव्यस्सर्वैरनलबलवीर्याणि कुरुते ॥

स्थूलशालिः ।

राजनिघण्टौ—

सूक्ष्मशालिस्तु मधुरो लघुः पित्तास्रदाहनुत् ।
दीपनः पाचनश्चैव किञ्चिद्वातविकारजित् ॥

सूक्ष्मशालिः ।

राजनिघण्टौ—

सुगन्धशालिर्मधुरोऽतिवृष्यः पित्तश्रमास्रारुचिदाहशान्तिदः ।
स्तन्यश्च गर्भस्थिरताल्पवातदः पुष्टिप्रदश्चाल्पकफश्च बल्यः ॥

गन्धशालिः ।

---

१. Bh. शालिर्बलस्तेषु
२. Bh. omits the word राजनिघण्टौ
३. Bh. omits the word राजनिघण्टौ
४. Bh. माध्मान शमयेत्

राजनिघण्टौ—

तिरियो मधुरः स्निग्धः शीतलो दाहपित्तजित् ।
त्रिदोषशमनो रुच्यः पथ्यः सर्वामयापहः ॥

"मासैर्जन्यस्त्रिभिस्स्यात् स भवति तिरियः" इति तल्लक्षणम् ।

तिरियशालिः ।

राजनिघण्टौ—

षष्टिवासरजस्सोऽयं ज्ञेयो मासद्वयोद्भवः ।

गौरो नीलष्षाष्टिकोऽयं द्विधा स्यादाद्यो रुच्यः शीतलो दोषहारी ।
बल्यः पथ्यो दीपनो वीर्यवृद्धिं दत्ते चास्मात् किञ्चिदूनो द्वितीयः ॥

षाष्टिका, मालवे प्रसिद्धाः ।

राजनिघण्टौ—

व्रीहिर्गौरो मधुररसकः पित्तहारी कषायः
स्निग्धो वृष्यः कृमिकफहरस्तापरक्तापहश्च ।
पुष्टिं दत्ते श्रमशमनकृद् वीर्यवृद्धिं विधत्ते
रुच्योऽत्यन्तं जनयति च मुदं वातकृन्मेचकोऽन्यः ॥

गौरशालिः, हरिद्र इति प्रसिद्धः ।

वाग्भटस्तु—

रक्तो महान् सकलमस्तूर्णकः शकुनाहृतः ।
सारामुखो दीर्घशूको रोद्ध्रशूकः सुगन्धकः ॥

पौण्ड्रकः पुण्डरीकश्च प्रमोदो गौरशालिकः ।
लाङ्गूलो लोहवालाख्यः कर्दमश्शीतभीरुकः ॥

---

१. Bh. omits the word राजनिघण्टौ

२. T1. has सर्वगदापहः and also the variant reading:—
सर्वाक्षतापहः, which variant T2. also gives.

३. Bh. प्रदत्ते

४. Bh. रुच्योत्पत्तिं जनयति

पतङ्गास्तपनीयाश्च ये चान्ये शालयश्शुभाः ।
स्वादुपाकरसास्स्निग्धा वृष्या बद्धाल्पवर्चसः ॥
कषायानुरसाः पथ्या लघवो मूत्रला हिमाः ।
शूकजेषु वरस्तत्र रक्तस्तृष्णात्रिदोषहा[1] ॥
महांस्तस्यानुकलमस्तं चाप्यनु ततः परे ।
यवका हायनाः पांशुबाष्पनैषधकादयः ।
स्वादूष्णा गुरवः स्निग्धाः पाकेऽम्लाः श्लेष्मपित्तलाः ॥
सृष्टमूत्रपुरीषाश्च पूर्वं पूर्वं च निन्दिताः ॥
स्निग्धो ग्राही लघुः स्वादुस्त्रिदोषघ्नः स्थिरो हिमः ।
षष्टिको व्रीहिषु श्रेष्ठो गौरश्चासितगौरतः ॥
ततः क्रमान्महाव्रीहिकृष्णव्रीहिजतूमुखाः ।
कुक्कुटाण्डकलावाख्यपारावतकसूकराः ॥
वरकोद्दालकोद्दालचीनशारददुर्दराः[2] ।
गन्धनाः कुरुविन्दाश्च गुणैरल्पान्तरास्स्मृताः ॥
स्वादुरम्लविपाकोऽन्यो व्रीहिः पित्तकरो गुरुः ।
बहुमूत्रपुरीषोष्मा त्रिदोषश्चैव पाटलः ॥ इति ।

रक्तो लोहितः । महान् महातण्डुलः कलमः, अन्तर्वेद्यां कलंबीति प्रसिद्धः । तूर्णकश्शीघ्रपाकी, आश्वयुज[3] इति काश्मीरे प्रसिद्धः । शकुनाहृतः गरुडापरनामा । उक्तं च—

द्वीपान्तरात्समानीतो गरुडेन महात्मना ।
शकुनाहृतशालिः स्यात् गरुडापरनामकः ॥ इति ।

सारामुखः कृष्णशुक्लाकारतण्डुलः । दीर्घशूकः अत्यायतशूकः । रोद्धशूको रक्तशूकः । सुगन्धकः गन्धशालिः । पौण्ड्रकः पाण्डुरशालिः । पुण्डरीकः श्वेतोत्पलः । प्रमोदकः प्रह्लादकः, कमोद इति प्रसिद्धः । गौरशालिकः हरिद्रः । लाङ्गलः सीरकृष्टभूमिजः । लोहवालः अतिकठिनतण्डुलः । कर्दमः पङ्कजः । शीतभीरुकः शीतमात्रनिष्पन्नः ।

---

१. Bh. रक्ततृष्णा

२. P1, P2, J1. दुर्दुराः

३. P1. P2. आश्वयुजभ इति

पतङ्गः उष्णानिष्पन्नः । तपनीयोऽल्पशीतजन्यः । त्रिदोषहेति रक्तविशेषणम् । तदीषद्गुणो महान् । तदनु कलमः । नैषधकादय इति आदिशब्देन चम्पकपात्रिकासङ्ग्रहः । ‘यवका’ इत्यारभ्य ‘निन्दिता’ इत्यन्त एको ग्रन्थः । शेषं स्पष्टम् । सुषेणः—

रुच्याः पाचनदीपना बलकरा वृष्यास्त्रिदोषापहा-
स्शुक्रश्लेष्मविवर्धना रुचिकराः सन्दीपनास्तर्पणाः ।
पथ्यास्सर्वगदे हिताः श्रमहराः क्षुत्तृड्श्रमध्वंसिनः
श्रेष्ठा व्रीहिषु षाष्टिकाः कलमका रक्ता महाशालयः ॥ इति ।

नीवाराणां व्रीहिवर्गे पाठमाह प्रयोगपारिजातः । वाग्भटस्तु तृणधान्यवर्गे । तत्र पूर्वस्यावयवसाम्यमुत्तरस्य गुणसाम्यं पाठहेतुः । गुणाश्च—

कषायमधुरो रूक्षो नीवारः कफपित्तहृत् ।
ग्राही लघुर्बलहरो मुनीनां देहधारकः ॥

देवसाळी ।

---

## अथ गोधूमाः ।

वाग्भटः —

वृष्यश्शीतो गुरुः स्निग्धो जीवनो वातपित्तहा ।
सन्धानकारी मधुरो गोधूमः स्थैर्यकृत्सरः ॥

राजनिघण्टौ —

गोधूमः स्निग्धमधुरो वातघ्नः पित्तदाहकृत् ।
गुरुः श्लेष्मप्रदो बल्यो रुचिरो वीर्यवर्धनः ॥ इति ।

स्निग्धोऽन्यो लघुगोधूमो गुरुर्वृष्यः कफापहः ।
आमदोषकरो बल्यो मधुरो वीर्यपुष्टिदः ॥

सोनेगहूं

---

१. T2 omits पत ...... ष्पन्नः

२. J1 omits this verse.

वाग्भटः —

पथ्या नान्दीमुखी शीता कषाया[1] मधुरा लघुः ।

दीर्घसूक्ष्मो गोधूमो नान्दीमुखी ।

काटेगहूं ।

भावप्रकाशे —

गोधूमस्सुमनोऽपि स्यात् त्रिविधस्स च कीर्तितः ।
महागोधूम इत्याख्यः पश्चाद्देशात्समागतः ॥

मधूली तु ततः किञ्चिदल्पा सा मध्यदेशजा ।
निःशूको दीर्घगोधूमः क्वचिन्नान्दीमुखाभिधः ॥

यत्तु 'कफशुक्रप्रदो बल्यः' इति ग्रन्थान्तरे कफकारित्वमुक्तं तन्नवीनविषयं ज्ञेयम् ।

## अथ यवाः ।

रूक्षश्शीतो गुरुः स्वादुस्सरो विड्वातकृद्यवः ।
वृष्यस्स्थैर्यकरो मूत्रमेदःपित्तकफान् जयेत् ॥
पीनसश्वासकासोरुस्तम्भकण्ठत्वगामयान् ॥

निघण्टौ —

यवः कषायो मधुरस्सुशीतलः प्रमेहजित् पित्तकफापहारकः ।
अशूकमुण्डस्तु यवो बलप्रदो वृष्यश्च नृणां बहुवीर्यपुष्टिदः ॥

'न्यूनो यवादनुयवः' इति वाग्भटः ।

यव ।

निघण्टौ —

शीतः कषायो मधुरश्च रूक्षो[2] मेहः क्रिमिश्लेष्मविषापहश्च ।
पुष्टिं च वीर्यं च बलं च दत्ते पित्तापहो वेणुयवः प्रशस्तः ॥

वंशबीजः[3] ।

---

१. $J_1$ कषायमधुरा

२. Bh. मधुरोऽतिरूक्षो

३. Bh. वेळूचबीज

## अथ यावनाळगुणाः ।

निघण्टौ —

धवळो यावनाळस्तु गौळ्यो बल्यस्त्रिदोषजित् ।
वृष्यो रुचिप्रदोऽर्शोघ्नः पथ्यो गुल्मव्रणापहः ॥

लैटोरा[1] ।

तुवरो यावनाळस्तु कषायोष्णो विशोषकृत्[2] ।
सङ्ग्राही वातशमनो विदाही शोककारकः ॥

रक्तस्य[3] ।

शारदो यावनाळस्तु श्लेष्मलः पित्तलो[4] गुरुः ।
शिशिरो मधुरो वृष्यो दोषघ्नो बलपुष्टिदः ॥

शालू[5] ।

यावनाळो महान् बल्यो दुर्जरो वातपित्तकृत् ।
रुच्यस्सन्तर्पणो[6] बालप्रियो मक्कासमुद्भवः ॥

मक्का ।

वाग्भटस्तु —

निस्सारो वातलो रूक्षो जूर्णस्त्वाध्मानकृत्सरः[7] ।

इति साधारण्येनाह ।

---

१. P1, P2, T1, T2. Bh. omit this

२. P1. P2. Bh. J1. शोषकारकः ।

३. J1 रक्तयावनाळः ।

४. J1. पिच्छलो

५. J1. कारशालू ।

६. J1. Omits 'रुच्य ... ... महासमुद्भवः' ।

७. J1 The Revisor adds in the margin after सरः इति
बरको वारयत्यग्निं वातव्याधिविवर्धनम्
धातूनां शोषणं ग्राहि रूक्षः सारविवर्जितः ॥ बरे
महाप्रियङ्गु गुरु स्वमणं स्यात्समीरकारी मधुरः कषाय. सज्गुर

दुद्दाला[1] मधुरा वृष्या वाजिनां पुष्टिकारकाः ।
वातप्रकोपना बल्याः पित्तघ्ना नाग्निदीपनाः ॥

सजगुरे ।

इति शूकधान्यप्रकरणम् ।

---

## अथ शिम्बीधान्यम् ।

वाग्भटः —

मुद्गाढकीमसूरादि शिम्बीधान्यं विबन्धकृत् ।
कषायं स्वादु सङ्ग्राहि कटुपाकं हिमं लघु ॥

मेदश्श्लेष्मास्रपित्तेषु हितं लेपोपसेकयोः ।

निघण्टौ—

धान्यानां कञ्चुकं शिम्बी बीजगुप्तिश्च सा भवेत् ।
तद्गुप्तानि तु धान्यानि शिम्बीधान्यानि चक्षते ॥

मुद्गास्तत्र वरास्स्वादुकषायाः कटुपाकिनः ।
ग्राहिणोऽल्पबला रूक्षा रोचना लघवो हिमाः ॥

मेहास्रपित्तश्लेष्मघ्ना बल्या दृष्टिप्रसाधनाः[2] ।

[3]तत्र निघण्टौ —

कृष्णमुद्गस्त्रिदोषघ्नो मधुरो वातनाशनः ॥

लघुश्च दीपनः पथ्यो बलवीर्याङ्गपुष्टिदः ।
हरिन्मुद्गः कषायश्च मधुरः कफपित्तनुत्[4] ॥

---

१. P1. दुद्दाला

२. J1. The Revisor adds in the margin—
दृष्टिप्रसादना मुद्गाः स्निग्धा नात्यर्थवातलाः ।
हरिताः सृष्टविण्मूत्रप्रधाना मुद्गजातिषु ॥

३. J1. वर्णविशेषेण मुद्गगुणाः निघण्टौ —

४. J1. कफपित्तहृत् ।

रक्तमूत्रामयघ्नश्च शीतलो लघुदीपनः ।
तद्वच्च धूसरो मुद्गो रसवीर्यादिषु स्मृतः ॥
कषायमधुरो रुच्यः पित्तवातविबन्धकृत्[1] ।

इति मुद्गगुणाः ।

---

## अथ माषगुणाः ।

निघण्टौ —

माषः स्निग्धो बहुमलकरः शोषणः श्लेष्मकारी
वीर्येणोष्णो झटिति कुरुते रक्तपित्तप्रकोपम् ।
हन्याद्वातं गुरु बलकरो रोचनो भक्ष्यमाणः
स्वादुर्नित्यं श्रमसुखवतां सेवनीयो नराणाम् ॥

सुखवतां अरोगिणाम् ।

राजमाषो नीलमाषो नृपमाषो नृपोचितः ।
कफपित्तहरो रुच्यो वातकृद्बलदायकः ॥
[2]अरण्यमाषा गुणतः प्रदिष्टा रूक्षाः कषाया अविदाहिनश्च ।

इति माषाः ।

---

## अथ राजमाषगुणाः ।

राजमाषो गुरुर्भूरिशकृद्रूक्षोऽतिवातलः ।
कषायानुरसः स्वादुरवृष्यः श्लेष्मपित्तजित् ॥

धाकुटेचवळे ।

निघण्टौ —

क्षवः कषायमधुरः शीतलः कफपित्तहृत् ।
वृष्यः श्रमहरो रुच्यः पवनाध्मानकारकः ॥

थोरचवळे ।

---

१. J1. पीतो वातविबन्ध

२. J1. Reads नीलमाषगुणाः । before अरण्यमाषा etc.

श्वेतो रक्तस्तथा कृष्णस्त्रिविधस्सम्प्रकीर्तितः ।
यो महांस्तेषु भवति स एवोक्तो[1] गुणाधिकः ॥

इति राजमाषगुणाः ।

---

## अथ चणकाः[2] ।

निघण्टौ—

चणको[3] मधुरो रूक्षो मेहजिद्वातपित्तकृत् ।
दीप्तिवर्णकरो रुच्यो बल्यश्चाध्मानकारकः[4] ॥

तथा —

चणकश्शीतलो रूक्षः पित्त[5]रक्तकफापहः ।
लघुः कषायो विष्टम्भी वातलो ज्वरनाशनः ॥

निघण्टौ—

आमश्चणः शीतलरुच्यकारी सन्तर्पणो दाहतृषापहारी ।
स्थौल्याश्मरीदोषविनाशकारी कषाय ईषत्कफवीर्यकारी ॥

---

## आर्द्रचणकगुणाः ।

स चाङ्गारेण सम्भृष्टस्तैलभृष्टस्तु तद्गुणः ।
आर्द्रभृष्टो बलकरो रोचनश्च प्रकीर्तितः ॥

---

१. P1. P2. पूर्वोक्तो

२. Bh. चणकगुणाः ।

३. Bh has these two verses as follow:

चणको मधुरो रूक्षो पित्तरक्तकफापहः ।
लघुः कषायो विष्टम्भी वातलो ज्वरनाशनः ॥

तथा —

चणकाश्शीतलो रूक्षः मेहजिद्वातपित्तकृत् ।
दीप्तिवर्णकरो रुच्यो बल्यश्चाध्मानकारकः ॥

४ P1. P2. ध्मातकारकः ।

५. P2. पित्तरोग

शुष्कभृष्टोऽतिरूक्षः स्याद् वातकुष्ठप्रकोपनः ।[1]
स्विन्नः पित्तकफौ हन्यात् सूपः क्षोभकरो मतः ॥
आर्द्रोऽतिकोमलो रुच्यः पित्तरक्तहरो हिमः ॥[2]

निघण्टौ —

कृष्णस्तु चणकः शीतो मधुरः कासपित्तजित् ।
पित्तातीसारशमनो बल्यश्चैव रसायनः ॥

कृष्णचणः ।[3]

निघण्टौ —

चणो गौरस्तु मधुरो बलकृद्रोचनः परः ।

गौरचणः ।[4]

श्वेतो वातकरो रुच्यः पित्तघ्नश्शिशिरो गुरुः ॥

श्वेतचणः ।[5]

इति चणकगुणाः ।

---

## अथ कलायः ।

निघण्टौ —

कलायः कुरुते वातं पित्तदाहकफापहः ।
रुचिपुष्टिप्रदश्शीतः कषायश्चामदोषकृत् ॥[6]
'हरितास्त्वेष्वतिवराः' इति वाग्भटः ।

बाठाणे ।

---

१. Bh. पित्तप्रकोपनः ।

२. Bh. करो हिमः ।

३. P1. P2. T1. T2. Bh. omit — कृष्णचणः ।

४. P1. P2. T1. T2, Bh. omit — गौरचणः ।

५. P1. P2. T1. T2. Bh. omit — श्वेतचणः ।

६. J1. The revisor adds in the margin after this :
पाठान्तरम् —

पुंस्त्वं विहन्ति च करोति निहन्ति पित्तं
स रक्तमपहन्ति कफं गुरुः स्यात् । (?)

## अथ लङ्कागुणाः ।

निघण्टौ —

लङ्का रुच्या हिमा गौल्या[1] पित्तजिद्वातकृद् गुरुः ।

तथा —

त्रिपुटो मधुरस्तिक्तस्तुवरो रूक्षणो भृशम् ।
कफपित्तहरो रुच्यो ग्राहकश्शीतलस्तथा ॥
कैलखञ्जत्वपङ्गुत्वकारी[2] वातातिकोपनः ॥

लांक ।

इति लङ्कागुणाः ।

---

## अथ तुवरीगुणाः ।

निघण्टौ —

आढकी तु कषाया स्यान्मधुरा कफपित्तजित् ।
ईषद्वातकरा रुच्या विदुला गुरु ग्राहिला ॥

इति । पारिजाते[3] —

आढकी कफपित्तघ्नी ग्राहिणी रक्तशीतला ।
कषायमधुरा गुर्वी ज्वरातीसारनाशिनी ॥
प्रमेहघ्नी घृते[4] सिद्धा त्रिदोषशमनी लघुः ।
सा च श्वेता दोषला लोहिता चेद्रुच्या बल्या पित्ततापोपहन्त्री ।
सा श्यामा चेद्दीपनी पित्तदाहध्वंसा बल्यं चाढकीसूपमुक्तम्[5] ॥

इति तुवरीगुणाः ।

---

१. Bh. स्थौल्या
२. P2. खिलखञ्जत्व ; Bh. कालखञ्जत्व
३. P1. P2. T1. T2. Bh. omit पारिजाते —
४. Bh. घृतास्निग्धा ।
५. J1. The revisor adds in the margin after this:
मसूरा लघवः पथ्यास्शीता रक्तक्षयापहाः ।
कषायमधुरा रूक्षा ग्राहिणो मारुतोष्मपाः ॥
त्रिदोषशमनं पथ्यं क्रमिघ्नं चाढकीदलम् ॥ इति ग्रन्थान्तरे

## अथ कुलित्थाः ।

कषायास्स्वादुरूक्षोष्णाः कुलित्था रक्तपित्तलाः ।
ग्राहिणो लघवस्तीक्ष्णा विपाकेऽम्ला विदाहिनः ॥
पीनसश्वासका[1]सार्शोहिध्मानाहकफानिलान् ।
घ्नन्ति शु[2]क्राश्मरीं शुक्रं [3]दृष्टिं शोफं तथोदरम् ॥

हुलवेळे ।

[4]एते शुक्लाश्च कृष्णाश्च लोहिताश्चित्ररूपिणः ।
एते समगुणास्सर्वे वेदिता गुणवेदिभिः ॥

आनाहमेदोगुदकीलहिक्काश्वासापहश्शोणितपित्तकृच्च ।
कफस्य हन्ता नयनामयघ्नो विशेषतो वन्यकुलित्थ उक्तः ॥

[5]राजकुलत्थी ।

इति कुलित्थगुणाः ।

---

## अथ निष्पावाः ।

निष्पावो वातपित्तासृक्स्तन्यमूत्रकरो गुरुः ।
सरो विदाही दृक्शुक्रकफशोफविषापहः ॥

[6]बेल्ळः ।

निघण्टौ —

मधुरः श्वेतनिष्पावो माध्वीका मधुशर्करा ।
पलङ्कषा स्थूलशिम्बी वृत्ता मधुसितासिता ॥

---

१. J1. कासाश्रोहिध्मानाह

२. T1 P1. P2. Bh. शुक्राश्मरी शुक्रं

३. All mss. read दृष्टिदोषं तथोदरम् । The text has been emended according to Aṣṭāṅgasaṅgraha, from which the quotation is taken.

४. J1. एते शुक्लकृष्णलोहितचित्रभेदेन चतुर्विधास्समगुणाः । सुषेणः — आनाह ... ... ... ... ... ... ...

५. P1. P2. T1. T2. Bh omit राजकुलत्थी ।

६. P1 P2 T1 T2. Bh. omit बेल्ळः ।

मधुशर्करा सुरुच्या (च) मधुराल्पकषायका ।
शिशिरा वातला बल्या चाध्मानगुरुपुष्टिदा ॥

श्वेतवेल्लः[1] ।

सोऽन्यश्च कटुनिष्पावः पर्चूरश्च नदीभवः ।
नदीनिष्पावकस्तिक्तः कटुकोऽस्रपदो गुरुः ॥
वातलः कफदो रूक्षः कषायो विषदोषनुत् ॥

नदीजः[2] ।

इति बल्यगुणाः ।

## अथ मकुष्ठाः ।

पारिजाते[3] —

मकुष्ठकः कषायस्स्यान्मधुरो रक्तपित्तजित् ॥
ज्वरदाहकरः पथ्यो रुचिकृत्सर्वदोषनुत् ।
'मकुष्ठाः कृमिकारिणः' इति वाग्भटः ।

मठा ।

## अथ तिलाः ।

उष्णस्त्वल्पो हिमस्पर्शः केश्यो बल्यस्तिलो गुरुः ।
अल्पमूत्रः कटुः पाके मेधाग्निकफपित्तकृत् ॥
स्वादुः कषायतिक्तश्च हृद्यश्शोफव्रणापहः[4] ।
शुक्लस्तिलः श्लेष्मपित्तबलवर्णकरो गुरुः ।
कृष्णस्तिलः प्रमेहार्शश्शोफघ्नो दन्तदार्ढ्यकृत् ॥[5]

१. P1. P2. T1. T2. Bh. omit श्वेतवेल्लः ।
२. P1. P2. T1. T2. Bh. omit नदीजः ।
३. P1. P2. T1. T2. Bh. omit पारिजाते —
४. P1. P2. स्वन्यो ।
५. J1. adds after this : तिलाः ।

निघण्टौ —

स्निग्धो वर्णबलाग्निवृद्धिजननः स्तन्योऽनिलघ्नो गुरुः
सोष्णः पित्तकरोऽल्पमूत्रकरणः केश्योऽतिपथ्यो व्रणे ।
ग्राही स्यान्मधुरः कषायसहितस्तिक्तो विपाके कटुः
कृष्णः पथ्यतमः सितोऽल्पगुणदः क्षीणास्ततोऽन्ये तिलाः ॥

इति । अन्ये जर्तिलाद्याः । 'जर्तिलस्तु वनोद्भवः ।'

पललं मधुरं रुच्यं पित्तास्रबलपुष्टिदम् ।

पललं तिलपिष्टकम् ।

पिना ।

पिण्याकः कटुको गौल्यः कफवातप्रकोपकृत् ।

पिण्याकस्तिलकल्कः ।

पेण्डि ।

इति तिलाः ।

---

## अथातसी ।

निघण्टौ —

अतसी मेदगन्धा स्यात् मधुरा बलकारिका ।
कफवातकरी चैषत्पित्तहृत्पृष्ठशूलनुत् ॥

जैवस ।

---

१. T 2. कृष्णश्श्रेष्ठतमः । J1. omits the first three lines in this verse.

२. T1. J1. omit पललं तिलपिष्टकम् ।

३. J1. omits पिण्याकस्तिलकल्कः ।

४ T2. मन्दगन्धा; J1. reads this verse after the next.

५. All mss. other than J1. omit this word.

तथा —

स्निग्धोमा स्वादुतिक्तोष्णा कफपित्तकरी गुरुः ।
दृक्शुक्रहृत्कटुः पाके तद्वद्बीजं कुसुम्भजम् ॥

कुसुंभे ।

इत्यतसीकुसुम्भगुणाः ।

---

## अथ सर्षपाः ।

निघण्टौ —

आसुरी कटुतिक्तोष्णा वातप्लीहार्तिशूलनुत् ।
दाहपित्तप्रदा हन्ति कफपित्तकृमिव्रणान् ॥

मोहेरी ।

राजसर्षपकस्तिक्तः कटूष्णो वातशूलनुत् ।
पित्तदाहप्रदो गुल्मकण्डूकुष्ठव्रणापहः ॥

कृष्णशिरस ।

निघण्टौ —

सिद्धार्थः कटुतिक्तोष्णो वातरक्तग्रहापहः ।
त्वग्दोषशमनो रुच्यो विषभूतग्रहापहः ॥

श्वेतसर्षप ।

इति सर्षपाः ।

---

१. T2. तदुद्बीजं. Bh. तद्बीजं च ।
२. All mss. other than J1. omit this word.
३. Bh. इति जवसकडईगुणाः ।
४. T2. गुल्मकृमि
५. P2. Gives also the Tamil equivalent *Kaṭuku*.
६. P1. omits the word कृष्णशिरस; P2. कृष्णसर्षप.
७. Bh. गदापहः ।

## अथ मसूराः ।

निघण्टौ —

मसूरो मधुरश्शीतः सङ्ग्राही कफपित्तजित् ।
वातामयकरश्चैव मूत्रकृच्छ्रहरो लघुः ॥

इति [1]मसूराः ।

---

इति शिम्बीधान्यप्रकरणम् ॥

---

## अथ तृणधान्यम् ।

वाग्भटः —

कङ्गुकोद्रवनीवारश्यामाकादि हिमं लघु ।
तृणधान्यं पवनकृल्लेखनं कफपित्तहृत् ॥

निघण्टौ —

स्त्रि[2]यां कङ्गुप्रियंगू द्वे कृष्णा रक्ता सिता तथा ।
पीता चतुर्विधा कङ्गुस्तासां पीता वरा स्मृता ॥

कङ्गुस्तु भग्नसन्धानवातकृद् बृंहणी गुरुः ।
रूक्षा श्लेष्महरातीव वाजिनां गुणकृद् भृशम् ॥

चीनाकः कङ्गुभेदोऽस्ति स ज्ञेयः कङ्गुवद् गुणैः ॥

[3]राळे ।

निघण्टौ —

श्यामाको मधुरः स्निग्धः कषायो लघुशीतलः ।
वातकृत्कफपित्तघ्नः सङ्ग्राही विषदोषनुत् ॥

सांवे [4] ।

---

१. P1. P2. Bh. मसूरगुणाः ।

२. Bh. त्रिधा कङ्गु ।

३. P2. Gives also the Tamil equivalent *Tenai*.

४. P2. Gives also the Tamil equivalent *Śāmai*.

निघण्टौ —

कोद्रवो मधुरस्तिक्तो व्रणानां पथ्यकारकः ।
कफपित्तहरो रूक्षो मोहकृच्छीतलो गुरुः ॥

हारक[1] ।

निघण्टौ —

वरको मधुरो रूक्षः कषायो वातपित्तकृत् ।

वरयी ।

वारिजो गिल्लाच्छिन्नो बहुदलकणिशश्च गुच्छकणिशश्च ।
तिक्तो मधुरकषायः शीतः पित्तास्रनाशनो बल्यः ॥

नाचणे ।

निघण्टौ—

कुरी तु तृणधान्यं स्यान्मधुरं तद्बलप्रदम् ।
हरितं चाथ पक्वं वा वाजिनां पुष्टिदायकम् ॥

ि, अन्तर्वेद्यां प्रसिद्धौ[2] ।

इति तृणधान्यप्रकरणम् ॥

---

१. P2. Gives also the tamil equivalent *Kevaraku*.

२. J1. The revisor adds the following in the margin

मलीनको रक्तमु ि नर्तको नर्तमुद्गकः ।
नीवारस्थण्डिलाम्वष्ठीवनव्रीहिर्मुनिप्रियः ॥
नर्तकश्चक्कसस्यं स्यान्निरशूको भूधरः खरः ।
नर्तकः व्रीहिसबलो ह्यर्णवो दोषहृल्लघुः ॥
नतकः पित्तहा शीतो वनव्रीहिफलप्रदः ॥

नीवार, वनव्रीहि नामभे गुणाः ।

## [अथ धान्यसामान्यगुणप्रकरणम् ।]

वाग्भटः —

माषोऽत्र सर्वेष्ववरो यवकश्शूकजेषु च ।

अत्र शिम्बीधान्ये । सुषेणः —

धान्यं वापितमुत्तमं तदखिलं छिन्नोद्भवं मध्यमं
ज्ञेयं यद्यदवापितं तदधमं निस्सारदोषप्रदम् ।
दग्धायां भुवि चोप्यतेऽपि विपिने ये वापिताः शालयो
ये च छिन्नभवा भवन्ति खलु ते विण्मूत्रबन्धप्रदाः ॥

क्षारोदकसमुत्पन्नं धान्यं सर्वरुजावहम् ।
स्वादु शुभ्रोदके जातं धान्यं सर्वरुजापहम् ॥[2]
सुस्निग्धमृत्तिकोद्भूतं धान्यमोजोबलप्रदम् ।
बलपुष्टिप्रभावघ्नं वालुकामृत्तिकोद्भवम् ॥

नवं धान्यमभिष्यन्दि लघु संवत्सरोषितम् ।
अब्दोषितं लघुतरं त्रिवर्षमबलं भवेत् ॥

चणका यवगोधूमास्तिला माषा यवा हिताः ।

[3]नवा इति शेषः ।

पुराणा विरसा रूक्षा अहिता दुर्जरा बलाः ।

---

१. J1. The revisor adds on this subject in the margin of the previous folio : अत्र —

सर्वं धान्यं नवं निन्द्यं नवमुद्गो वरो हितः ।
संवत्सरोषितो व्रीहिर्लघुः पथ्यतमो मतः ॥

केचिदाचक्षते धान्यं पथ्यं श्रेष्ठं त्रिवार्षिकम् ।
षण्मासानन्तरं पथ्यं शिम्बीधान्यं प्रचक्षते ॥

तत्र माषोऽवरः प्रोक्तः शूकजेषु यवो मतः ।
व्रीहिधान्येषु सर्वेषु शालिः श्रेष्ठतमो मतः ॥

शिम्बीधान्येषु सर्वेषु प्रवरो मुद्ग उच्यते ॥

२. T2. omits 'स्वादु...पहम्'

३. T1. Bh. J1. omit नवा इति शेषः ।

वाग्भटः—

नवं धान्यमभिष्यन्दि सैक्यं केदारजं च यत् ।

अभिष्यन्दीत्यन्वयः ।

लघु वर्षोषितं दग्धभूमिजं स्थलसम्भवम् ।
शीघ्रजन्म तथा सूप्यं निस्तुषं युक्तिभर्जितम् ॥ इति ॥

---

## अथ भृष्टधान्यगुणाः ।

ये केचिद् व्रीहयो भृष्टास्ते लाजा इति संज्ञिताः ।

उपलक्षणमेतत् ।

येषां स्युस्तण्डुलास्तानि धान्यानि सतुषानि तु ।
भृष्टानि स्फुटितान्याहुर्लाजा इति मनीषिणः ॥

इति अभिधानात् ।

लाजाः स्युश्छर्द्यतीसारमेहमेदःकफच्छिदः ।
कासपित्तोपशमना दीपना लघवो हिताः ॥

तथा—

लाजास्स्युर्मधुराश्शीता लघवो दीपनाश्च ते ।
स्वल्पमूत्रा अल्परूक्षा बल्याः पित्तकफच्छिदः ॥
छर्द्यतीसारदाहास्रमेहमेदस्तृपापहाः ॥

निघण्टौ—

लाजाश्च यवधानाश्च तर्पणाः पित्तनाशनाः ।
गोधूमयावनालोत्थाः किञ्चिदुष्णाश्च दीपनाः ॥

इति लाजाः ।

---

निघण्टौ—

यवास्तु निस्तुषा भृष्टाः स्मृता धाना इति स्त्रियाम् ।
धानास्तु दुर्जरा रूक्षास्तृट्प्रदा गुरवश्च ताः ॥
तथा मेदःकफच्छर्दिनाशिन्यस्सम्प्रकीर्तिताः ॥

इति धानाः ।

---

## अथ सक्तवः ।

धान्यानि भ्राष्ट्रभृष्टानि यन्त्रपिष्टानि सक्तवः ।

तत्र—

यवजास्सक्तवश्शीता दीपना लघवस्सराः ।
कफपित्तहरा रूक्षा लेखनाश्च प्रकीर्तिताः ॥

ते पीता बलदा वृष्या बृंहणा भेदनास्तथा ।
तर्पणा मधुरा रुच्याः परिणामे बलावहाः ॥

कफपित्तश्रमक्षुत्तृड्व्रणनेत्रामयापहाः ।
प्रशस्ता घर्मदाहाध्वव्यायामार्तशरीरिणाम् ।

यवसक्तु ।

निस्तुषैश्चणकैर्भृष्टैस्तुर्यांशैश्च यवैः कृताः ।
सक्तवश्शर्करासर्पिर्युक्ताः ग्रीष्मेऽतिपूजिताः ॥

चणकयवसक्तु ।

सक्तवश्शालिसम्भूता वह्निदा लघवो हिमाः ।
मधुरा ग्राहिणो रुच्याः पथ्याश्च बलशुक्रदाः[1] ॥

शालिसक्तु ।

अन्यांस्तत्तद्द्रव्यगुणान् लघून् किञ्चिद्विशेषतः ।
यावनालादिसम्भूतान् विजानीयाद्विचक्षणः ॥

---

१. $P_1$. 'बलभुक्तदाः'

सक्तवो लघवः क्षुत्तृट्श्रमनेत्रामयव्रणान् ।
घ्नन्ति सन्तर्पणाः पानात् सद्य एव बलप्रदाः ॥

नोदकान्तरितान्न द्विर्न निशायां न केवलान् ।
न भुक्त्वा न द्विजैश्छिन्नान् सक्तूनद्यान्न वा बहून् ॥

इति सक्तुप्रकरणम् ।

---

शालयस्सतुषा आर्द्रा भृष्टा अस्फुटिताश्च ताः ।
कुट्टिताश्चिपिटास्सम्यक् ते स्मृताः पृथुका इति ॥

पृथुका गुरवो वातनाशनाः श्लेष्मला अपि ।
सक्षीरा बृंहणा वृष्या बल्या भिन्नमला हि ते ॥

पोहे ।

अर्धपक्वैश्शमीधान्यैस्तृणभृष्टैश्च होलकः ।
होलकोऽल्पानिलो मेदःकफदोषश्रमापहः ॥

भवेद्यो होलको यस्य स च तत्तद्गुणो भवेत् ।

उळा ।

मञ्जरी त्वर्धपक्वा या यवगोधूमयोर्भवेत् ॥

तृणानलेन संसृष्टा बुधैरुम्बीति सा स्मृता ।
उम्बी कफप्रदा बल्या लघ्वी पित्तानिलापहा ॥

ओंवी[1] ।

अर्धस्विन्नास्तु गोधूमा अन्येऽपि चणकादयः ।
कुल्माषा इति कथ्यन्ते शब्दशास्त्रेषु पण्डितैः ॥

---

१. J1. The revisor adds the following in the margin—

पाचितं शुक्लशिम्बीरापिष्टाभ्यां पित्तकोपनम्
कुर्याच्छिरोभ्रमं कार्श्यं प्रशस्तं देहिनां हितम् ॥

अंबीलपाण्याची ॥

१. Bh. घर्मस्विन्नास्तु.

कुल्माषा गुरवो रूक्षा वातला भिन्नवर्चसः ।
यवपिष्टमुष्णोदकसिक्तमीषत्स्विन्नमपूपीकृतं कुल्माष इति केचित्[१] ।

घुगर्या

दग्धबीजास्सुमधुरा दुर्जरा वीर्यपुष्टिदाः ।

तथा—

सुभृष्टश्चणको रुच्यो वातघ्नो रक्तदोषकृत् ।
वीर्येणोष्णो लघुश्चैव स्वेदशैत्यापहारकः ॥

फुटाणे[३] ।

स्विन्नास्तु दग्धबीजास्स्युर्मधुरा[२] वीर्यपुष्टिदाः ।
त एव लवणोपेताः किञ्चिदल्पगुणा मताः ।

मिठाणे ।

तैलेऽथ वापि च घृते जरणादियुक्ते
तप्ते जलार्द्रचणकाः सुभृतास्सुयुक्त्या[४] ।
वातालपदाः शिखिकरास्सबला[५] न रूक्षा
हृद्या भवन्ति सुखदा अपि बालकानाम् ॥

उसळे ।

इति भृष्टधान्यप्रकरणम् ॥

---

## अथ सिद्धान्नप्रकरणम् ॥

समवायिनि हेतौ ये कथिता गुणिभिर्गुणाः ।
कार्येऽपि तेऽखिल ज्ञेयाः परिभाषेयमीरिता ॥

---

१. P1. P2. स्विन्नं पूर्णकृतम् ।

२. P1. P2. बीजास्तु मधुरा Bh. बीजास्समधुरा.

३. P2. Gives also the Tamil equivalent *Porikadalai.*

४. P1. सुभृताः; P2. सुसताः.

५. J1. ह्यबलाश्च रूक्षा ।

क्वचित् संस्कारभेदेन गुणभेदो भवेदिह ।
भक्तं लघु पुराणस्य शालेस्तच्चिपिटो गुरुः ।

क्वचिद्योगप्रभावेन गुणान्तरमपीष्यते ।
कादळं गुरुसर्पिश्च तद्युक्तं सुपचं भवेत् ॥

वेत् कादळं फलम् । युक्तं सर्पिषेत्यर्थः । तत्र—

यवागूः षड्गुणजले सिद्धा स्याच्छिथिलोदनः ।
यवागूर्ग्राहिणी बल्या तर्पणी वातनाशिनी ॥

विलेपी च घना सिक्थैः सिद्धा नीरे चतुर्गुणे ।
विलेपी तर्पणी वृष्या मधुरा पित्तनाशिनी ॥

द्रवाधिका स्वल्पसिक्था चतुर्दशगुणे जले ।
सिद्धा पेया बुधैर्ज्ञेया यूषः किञ्चिद्घनस्ततः ॥

पेया लघुतरा ज्ञेया ग्राहिणी धातुपुष्टिदा ।
यूषो बल्यस्ततः कण्ठयो लघुः पाके कफावहः ॥

इति यवाग्वादिलक्षणानि गुणाश्च ॥

---

## अथ भक्तगुणाः ॥

सुधौतांस्तण्डुलांस्फीतान् तोये पञ्चगुणे पचेत् ।
तद्भक्तं प्रस्नुतं चोष्णं विशदं गुणवत्तरम् ॥

भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु ।
अधौतमस्नुतं शीतं गुर्वरुच्यं कफप्रदम् ॥

---

१. P1. P2. T2. add पुराणस्य शालेः after गुरुः ।

२. T1. Bh. omit तत्...त्यर्थः; J1 omits तत् ..... कफावहः ॥

३. Bh. पाचनम्.

उष्णोदनो भ्रममदात्ययरक्तपित्त-
मेहप्रदः क्रिमिहरः कसनार्तिनिघ्नः ।
आध्यानगुल्मपवनक्षयकासहिक्का-
श्वासापहश्च कफकृल्लघुदीपनश्च ॥

शीतोदनं शीतरमग्निसाद-
श्वासप्रसेकानिलविड्विबन्धान् ।
कुर्यादसृक् पित्तहरं च मोह-
मूर्च्छाभ्रमच्छर्दिमदामयघ्नम् ॥

केचित्तु[1]--

जले चतुर्दशगुणे तण्डुलानां चतुष्पलम् ।
विपचेत्स्रावयेन्मण्डं स भक्तो मधुरो लघुः ॥ इति ॥

मांसस्य ।

रसोदनो ज्वरहरो बल्यो वातनिबर्हणः ।

रसोदनम् ।

घोलभक्तं हिमं स्वादु हृद्यं पाचनदीपनम् ।
आमशूलग्रहण्यर्शोहरं पुष्टिरुचिप्रदम्[2] ॥

मुद्गौदनम् ।

तण्डुला दालिसंयुक्ता लवणार्द्रकहिङ्गुभिः ।
युक्ताश्च सलिले सिद्धाः कृसराः कथिता बुधैः ॥
कृसरा शुक्रला बल्या गुरुपित्तकफप्रदा ।
दुर्जरा बहुविष्टम्भमलमूत्रकरी स्मृता ॥

खिचडी, मिश्रौदनम्[3] ।

'मिश्रैश्शूकशिम्बीधान्यैरोदनो मिश्रको मतः ।' इत्यभिधानात् ।

घृते हरिद्रासंयुक्तमाषाणां भर्जयेद्वटीः ।
तण्डुलांश्चापि निर्धौतान् सहैव परिवर्तयेत् ॥

---

१. J1. omits केचित्तु—जले ... मांसस्य ।

२. Bh बलप्रदम्.

३. Bh. चित्रोदनम्; J1. omits: मिश्रौदनम् ... इत्यभिधानात् ।

सिद्धयोग्यं जलं तत्र निक्षिप्य कुशलः पचेत् ।
लवणार्द्रकहिंगूनि मात्रया तत्र निक्षिपेत् ॥

एषा सिद्धिं समायाता प्रोक्ता तापहरी बुधैः ।
भवेत्तापहरी बल्या वृष्या श्लेष्माणमाचरेत् ॥

बृंहणी तर्पणी रुच्या गुर्वी तत्तद्गुणा स्मृता ।

तापहारी । तापहारीत्यौत्तरेषु प्रसिद्धा ।

क्रियासारे तु—

निवेद्यकरणे प्रोक्ता श्रेष्ठा आढकतण्डुलाः ।
तांश्च निर्णिज्य निष्पीड्य षोढाम्भः क्षालयेद्बुधः ॥

सार्धाढकप्रमाणं तु तण्डुलानां जलं स्मृतम् ।
शुद्धैश्शुष्कैर्दारुभिश्च सुदीप्तैः परिपाचितम् ॥

केवलान्नमिति प्रोक्तमिदमन्नं मुनीश्वरैः ॥

परमान्नं हरिद्रान्नं दध्यन्नं कृसरोदनम् ।
गुडोदनं च मुद्गान्नमित्यन्नं षड्विधं स्मृतम् ॥

तण्डुलात्त्रिगुणं दुग्धं दुग्धार्धं जीवनीयकम् ।
तदर्धं गुडचूर्णं तु परमान्नमिति स्मृतम् ॥

परमान्नम् ।

संस्कृतं मथितं गव्यं तण्डुलानां चतुर्गुणम् ।
ईषद्धरिद्रया युक्तं मरीचाजाजिसंयुतम् ।
एतदुक्तं हारिद्रान्नं सुपक्वं पाचितं तथा ॥

हरिद्रान्नम् ।

मधुराम्लेन गोदध्ना शुद्धान्नं तु विमिश्रितम् ।
तण्डुलद्विगुणेनैव मरीचक्षोदसंयुतम् ।
लवणार्द्रकसंयुक्तमेतद्दध्योदनं स्मृतम् ॥

दध्योदनम् ।

तण्डुलार्धं मुद्गभिन्नं वारिणा सह सम्पचेत् ।
युक्तं मरीचचूर्णेन तिलचूर्णं विनिक्षिपेत् ॥

इदं कृसरनामान्नमित्याख्यातं मुनीश्वरैः ॥

कृसरान्नम् ।

पूर्वोक्तपायसे युंज्यात् दुग्धार्धं गुडखण्डकम् ।
तदर्धमाज्यं मोचायाः फलमेतद् गुडोदनम् ॥

गुडान्नम् ।

पूर्वोक्तपायसवत्तण्डुलात्रिगुणदुग्धदुग्धार्धजलयोगे दुग्धार्धगुडं योजयित्वा पचेत् । इतरथा गुडोदनमिति संज्ञानुपपत्तेः ।

तण्डुलस्य त्रिभागैकमुद्गखण्डेन मिश्रितम् ।
पक्वं यदेतन्मुद्गान्नमाख्यातं च चतुर्मुखम् ॥

विना शुद्धान्नमन्येषां प्रदद्याल्लवणं बुधः ।
गुणानेषां यथायोगं विजानीयाद्विचक्षणः ॥

**हृदयदीपः**—

भूतोदनो दधिनिशासक्तुलाजतिलान्वितः ।
भूतापसरणे योग्यमेतत्प्राहुर्विचक्षणाः ॥

भूतोदनम् ।

इत्योदनप्रकरणम् ।

---

१. J1. After this the revisor adds in the margin the following verses :

क्षीरान्नमसकृत्पुष्टिं शुक्लं कुर्याच्च पित्तनुत् ।
किञ्चिच्छ्लेष्मकरं हृद्यमरुचौ च समीरणे ॥
हृल्लासे च प्रशस्तं स्यात्तद्वद्बालकवृद्धयोः ॥

दध्यन्नं कफपित्तकोपजननं बल्यं परं बृंहणं
मक्षे(?)न्नं गुरु जाठरस्य दहनस्यादापयेन्मन्दताम् ।
पथ्यं नैव भवेद्व्रणातुरनृणां स्याद्रक्तजिद्ध्वंसनं
ग्राही रूक्षं (?) विनिहन्ति मारुततती रोचिष्णु जाड्यप्रदम् ॥

अन्नं तक्रपरिप्लुतं प्रतिदिनं शस्तं मनःप्रीणनं
मेधाबुद्धिविवर्धनं विनिहरेन्मोहानशेषानपि ।
शोषघ्नं करपाण्डुशोफशमनं कायाग्निसन्दीपनं
कुष्ठार्शोग्रहणीगदप्रशमनं च्छायाप्रदं पुष्टिदम् ॥

घृतान्वितान्नं वितनोति पुष्टिं कायाग्निसन्दीपनपाचनं च ।
पथ्यं सदा पित्तविकारि जन्तोः पुष्टिप्रदं कोऽन्धनयो(?)र्हितं च

## अथ क्षीरी ।

शुद्धेऽर्धपक्वे दुग्धे तु घृताक्तांस्तण्डुलान् क्षिपेत् ।
ते सिद्धाः क्षीरिका[1] ख्याता सा सिताज्ययुतोत्तमा ।।
क्षीरिका दुर्जरा बल्या धातुपुष्टिप्रदा गुरुः[2] ।
विष्टम्भिनी हरेत्पित्तं रक्तपित्ताग्निमारुतान् ।।

---

## अथ नारिकेरक्षीरी ।

नारिकेरं तनूकृत्य छिन्नं पयसि[3] गोः क्षिपेत् ।
सितागव्याज्यसंयुक्तं तत्पचेन्मृदुवह्निना ।।

नारिकेरोद्भवा क्षीरी स्निग्धा शीतातिपुष्टिदा ।
गुर्वी सुमधुरा वृष्या रक्तपित्तानिलापहा ।।

समिता वर्तिकाः कृत्वा सुसूक्ष्मास्तन्तुसन्निभाः ।
शुष्काः क्षीरेण संसाध्या भोज्या घृतसमन्विताः ।।

सेविका तर्पणी बल्या गुर्वी पित्तानिलापहा ।
ग्राहिणी सन्धिकृद्रुच्या तां खादेन्नातिमात्रया ।।

[4]इयं च चमसीक्षीरिः । 'चमसी पिष्टवर्तिके'ति हैमनः । सेवया
इदमन्योपलक्षकम् । [5]अन्यासां समिताविकारक्षीरिणाम् ।

इति क्षीरीप्रकरणम् ।।

---

१. 'वोतो गुणवचनात्' (४-१-४४) इति ङीष्विकल्पः ।
२. $P_1$.पीना रक्त ; $P_2$. Bh. $T_1$. पीता रक्त ।
३. $J_1$. The revisor corrects this as गोपयसि क्षिपेत् ।
४. $J_1$. omits 'इयं च ..... हैमनः' ।
५. $J_1$. omits अन्यासां समिताविकारक्षीरिणाम् । इति क्षीरीप्रकरणम् ।।

## अथ सूपः ।

दाळी तु सलिले सिद्धा लवणार्द्रकहिङ्गुभिः ।
संयुक्ता सूपनाम्नी स्यात् कथ्यन्ते तद्गुणा अथ ॥
सूपो विष्टम्भको रूक्षः शीतस्तु स विशेषतः ।
निस्तुषो भृष्टसिद्धस्स लाघवं सुतरां व्रजेत् ॥

वाग्भटः—

प्रभूताभ्यन्तरमलो माषसूपः परं मतः ।

पारिजाते—

विशिष्टो मुद्गकुल्माषो गुरू रुच्यो विबन्धकृत् ।
वातलः श्लेष्मपित्तघ्नः प्रमेहगलरोगजित् ॥
निस्तुषो मुद्गकुल्माषो मधुरश्शीतलस्सरः ।
वातगुल्मप्लीहवह्निसादारुचिहरः परम् ।
विशेषादाढकीसूपः स्वादुर्विष्टम्भकृद्गुरुः ॥

पित्तज्वरार्तिशमनं लघु मुद्गयूषं
सन्तापहारि तदरोचकनाशनं च ।
रक्तप्रसादनमिदं यदि सैन्धवेन
युक्तं तदा पिबति सर्वरुजापहारि ॥

वाग्भटः—

मौद्गस्तु पथ्यस्संशुद्धः व्रणकण्ठाक्षिरोगिणाम् ।
'वर्यं चाढकिसूपमुक्तमि'ति च ।

---

१. Bh. has before the next verse इति सूपाः ॥ अथ सारप्रकरणम्
सारं भोजनसारं सारं सारङ्गलोचनाभरतः ।
पिब खलु वारं वारं नो चेन्मुधा भवति संसारम् ॥
अथाम्लिकासारम् ।
आम्लिकायाः फलं पक्वं प्रस्थे नीरे विनिक्षिपेत् ।
वातघ्नं कफदाहाघ्न पित्तदोषविनाशनम् ॥

२. P1. रुच्यस्संशुद्ध.

चणस्य यूषं मधुरं कषायं
कफापहं वातविकारहन्तृ ।
श्वासोर्ध्वकासामयपीनसानां
करोति नाशं बलदीपनं च ॥

सुषेणः—

असितचणकयूषं दाहनाशं विधत्ते
प्रबलमहिललब्धं सर्वमेहप्रणाशम् ।
दहनमरिचयोगाद्वातरोगापहारि-
विदलमतिविपक्वं सर्वदोषं जहाति ॥

प्रबलेति प्रबलयुवतिलब्धानेकमेहप्रणाशमिति वक्तुरभिप्रायः । दहनं हिंगु ।

कुलित्थयूषोनिलहृच्छर्कराश्मरिनाशनः ।
दीपनः पित्तकफकृद्धातुसाम्यकरो लघुः ॥
ज्वरातिसारतृड्दाहव्रणकण्ड्वक्षिरोगजित् ॥

तथा—

वातानुलोमी कौलत्थो गुल्मतूनीप्रतूनिजित् ।

माषूरयूषगुणानाह सुषेणः—

प्रभूतवातं कुरुतेऽतिरूक्षः कफापहः पित्तहरो नराणाम् ।
रुचिप्रदः शूलकरो विशेषादामानुबन्धी कथितः कषायः ॥
माषूर इति शेषः ।

---

१. P1. विदलमपि ।

२. T1. Bh. J1. omit प्रबलेति . . . . . हिंगु ।

३. P1. P2. T1. Bh. read this line before the line प्रभूतवातं ... ... ... नराणाम्

४. J1. नितान्तम् ।

५. J1. शूलकरो नराणामामानुबन्धी ।

६. J1. omits माषूर इति शेषः ।

अगस्तिसारस्सुस्वादुस्तिक्तो वायुकफप्रणुत् ।
पाण्डुशोफारुचिप्लीहगुल्मशूलगदापहः ॥

अगस्तिसारः ।

विद्यायूषे रसे सूपे शाके चैवोत्तरोत्तरम् ।
गौरवं तनुसान्द्राम्लस्वादुष्वेवं पृथक् पृथक्[1] ॥

इति सूपप्रकरणम् ।

---

## अथ भक्ष्याणि ।

तत्र --

गोधूमा धवला धूताः[2] कुट्टिताश्शोषितास्ततः ।
प्रोत्क्षिप्ता यन्त्रनिष्पिष्टाश्चालितास्समितास्स्मृताः[3] ॥

मैदा ।

वारिणा कोमलां कृत्वा समितां साधु मर्दयेत् ।
हस्तलालनया तस्या लोप्त्रीं सम्यक् प्रसारयेत् ॥

लोप्त्री, उंडा इति भाषया ।

अधोमुखघटस्यैतां विस्तृतां प्रक्षिपेद्बहिः ।
मृदुना वह्निना साध्यो सिद्धो मण्डक उच्यते ॥

दुग्धेन साज्यखण्डेन मण्डकं भक्षयेन्नरः ।
अथवा सिद्धमांसेन सतक्रवटकेन वा ॥

---

१. $J_1$. पृथक् तथा ।

२. $T_2$. धौताः ।

३. $T_2$. adds 'गोधूमचूर्णे समिता यवक्षोदे तु चिक्कसः' इति हैमनः । 'चूर्णं गोधूमजं समित्' इति हृदयदीपः । $P_1$. $P_2$. add the latter quotation only.

मण्डको बृंहणो वृष्यो बल्यो रुचिकरो भृशम् ।
पाकेऽपि मधुरो ग्राही लघुर्दोषत्रयापहः ॥

माण्डे ।

कुर्यात्समितयातीव तन्वीं पर्पटिकां ततः ।
स्वेदयेत्तप्तके तां तु पोळिकां जगदुर्बुधाः ॥

तप्तकं, तवा इति भाषया ।

तां खादेल्लप्सिकायुक्तां तस्या मण्डकवद् गुणाः ।

पोळी ।

लप्सिका च —

समितां सर्पिषा भृष्टां शर्करां पयसि क्षिपेत् ।
तस्मिन् घनीकृते न्यस्येल्लवङ्गमरिचादिकम् ॥

सिद्धैषा लप्सिका ख्याता गुणानस्या वदाम्यहम् ।
लप्सिका बृंहणी वृष्या बल्या पित्तानिलापहा ॥

स्निग्धा श्लेष्मकरी गुर्वी रोचनी तर्पणी परा ॥

इति ।

कापसी ।

---

१. P1. P2. T2. Bh add after this;—

प्रकारान्तरमाह —

भ्राष्ट्रं नूतनमानीयारुष्करैर्गोशकृद्युतैः[२] ।
कुट्टितैर्लेपयेत्सम्यगातपे तत्तु शोषयेत् ॥

तापयित्वाथ तद्वह्नौ तैलेन सह साक्षया ।
विलिम्पेद् भ्राष्ट्रमेवं स्यात् तत्कार्यक्षममीदृशम् ॥

प्रक्षाल्य तण्डुलान् सम्यक् चूर्णीकुर्यादुलूखले ।
शोधयेदथ वस्त्रेण शुद्धेन च दृढेन च ॥

जलेन योजिते तस्मिन् द्रवीभूते नवं दृढम् ।
वस्त्रं निमज्जयेत्तेन ताडयेत्तप्तखर्परम् ॥
किञ्चित्कालेन लग्नं तत् पिष्टं मण्डकतां व्रजेत् ॥

अनेन प्रकारेण सर्वधान्यानां मण्डका भवन्ति । गुणाः प्रकृतिवद् ज्ञेयाः ।

२. P1. P2. मानीय खर्परैः

शुष्कगोधूमचूर्णेन किञ्चित्पुष्टां च पोळिकाम् ।
तप्तके स्वेदयेत्कृत्वा[1] भूयोऽङ्गारेऽपि पाचयेत् ॥
सिद्धैषा रोटिका प्रोक्ता गुणानस्याः प्रचक्ष्महे ।
रोटिका बलकृद्रुच्या बृंहणी धातुवर्धिनी ॥
वातघ्नी कफकृद् गुर्वी दीप्ताग्नीनां प्रशस्यते ॥

रोटी, उस्वर

शुद्धगोधूमचूर्णं तु साम्बु गाढं विमर्दयेत् ।
विधाय वटकाकारं निर्धूमेऽग्नौ शनैः पचेत् ॥
अङ्गारकर्कटी ह्येषा बृंहणी शुक्रला लघुः ।
दीपनी कफकृद् बल्या पीनसश्वासकासजित् ॥

लिटी ।

अङ्गारपोळिकाश्शस्ताः विधूमाङ्गारपाचिताः ।
लघ्व्यो बलकरा वृष्या दोषघ्ना वह्निदीपनाः ॥
तावद्गर्जति वर्गोऽत्र भक्ष्याणां श्लाघतेऽपि च ।
उष्णोष्णसर्पिषा भुक्ता यावन्नाङ्गारपोळिका ॥

अङ्गारपोळी !

यवजा रोटिका रुच्या मधुरा विशदा लघुः ।
मलशुक्रानिलकरी बल्या हन्ति कफामयान् ॥
पीनसश्वासकासांश्च मेदोमेहगळामयान् ॥

जवांचीरोटी ।

चूर्णं यच्छुष्कमाषाणां वमसी साभिधीयते ।
वमसीरचिता रोटी कथ्यते बलभद्रिका ॥
रूक्षोष्णा वातला बल्या दीप्ताग्नीनां प्रयोजिता[3] ॥

माषरोटी ।

---

१. T2· P1. P2. स्वेदयेद्धत्या ।
२. P1. P2. तापघ्नी ।
३. J1. प्रपूजिता ।

माषाणां दालयस्तोयस्थापितास्त्यक्तकञ्चुकाः ।
आतपे शोषिता यन्त्रपिष्टास्ता धूमसीस्स्मृताः ॥

धूमसीरचिता सैव प्रोक्ता झर्झरिका बुधैः ।
झर्झरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता ॥

झर्झरी, डांगर ।

चाणक्या रोटिका रूक्षा श्लेष्मपित्तास्रणुद्गुरुः ।
विष्टम्भिनी न चक्षुष्या तद्गुणा तिलशष्कुली ॥

चणकरोटी ।

दाली संस्थापिता तोये ततोऽपहृतकञ्चुका ।
शिलायां साधु सम्पिष्टा पिष्टिका कथिता बुधैः ॥

माषपिष्टिकया पूर्णगर्भा गोधूमचूर्णतः ।
रचिता रोटिका सैव प्रोक्ता वेढणिका बुधैः ॥

तथा—

गोधूमचूर्णघनवेष्टितमाषमुद्ग-
पिष्टं सुपक्वमिति वेढणिकां वदन्ति ।
तां भक्षयेदतिबलं लभते मनुष्य-
स्तैलेन वाथ सुघृतेन सुगन्धिना वा ॥

भवेद्वेढणिका बल्या वृष्या रुच्यानिलापहा ।
उष्णा सन्तर्पणी गुर्वी बृंहणी शुक्रला परम् ॥
भिन्नमूत्रमला स्तन्यमेदःपित्तकफप्रदा ।
गुदकीलार्दितश्वासपक्तिशूलानि नाशयेत् ॥

वेढणी ।

घृतेन तलिता सैव वडोरीति प्रकथ्यते ।
वडोरी तद्गुणा किञ्चिल्लघ्वी च रुचिकृत्परा ॥

वेडारी ।

धूमसीरचिता हिङ्गुहरिद्रालवणैर्युताः ।
जीरकस्वर्जिकाभ्यां च तनूकृत्य च वेल्लिताः ॥

पर्पटास्ते सदङ्गारभृष्टाः परमरोचकाः ।
दीपनाः पाचना रूक्षा गुरवः किञ्चिदीरिताः ॥

मौद्गाश्च तद्गुणाः प्रोक्ता विशेषाल्लघवश्च ते ।
चणकस्य गुणैर्युक्ताः पर्पटाश्चणकोद्भवाः ॥

स्नेहभृष्टाश्च ते सर्वे भवेयुर्मध्यमाः गुणैः ।
लघवः पर्पटा रुच्याः कफवातास्त्रपित्तसम्भवाः ॥

पापड ।

---

अथ वटकाः ।

माषाणां पिष्टिकां शुक्तां लवणार्द्रकहिङ्गुभिः ।
कृत्वा विदध्याद्वटकांस्तांस्तैले विपचेच्छनैः ॥

विशुष्का वटका बल्या बृंहणा वीर्यवर्धनाः ।
वातामयहरा रुच्या विशेषादर्दितापहाः ।
विबन्धभेदिनः श्लेष्मकारिणोऽप्यग्निपूजिताः ॥

कोरवडे[1] ।

संचूर्ण्य निक्षिपेत्तक्रे भृष्टहिङ्गु च जीरकम् ।
लवणं तत्र वटकान् सकलानपि मज्जयेत् ॥

शुक्लस्तक्रवटको बलकृद्रोचको गुरुः ।
विबन्धहृद्विदाही च श्लेष्मलः पवनापहः ॥

तक्रं पिष्टमरीचहिङ्गुमिलितं कुस्तुम्बरीसंयुतं
युक्त्यावर्तितमर्धशेषमपरे भाण्डे सुधूपावृते ।
त्यक्तास्तत्र मनोहरांश्च वटकान् तेषां रुचिं मार्दवं
स्वादुत्वं च सुसौरभं गुणगणं वेत्तीह विश्वेश्वरः ॥

तक्रवटकाः ।

---

१. P1. P2. शुष्ककोरवडे ।

काञ्जिकेषु विनिक्षिप्ता वटका माषसम्भवाः ।
वातघ्ना रोचका हृद्याः कफपित्तप्रकोपनाः ॥

काञ्जिवटकाः ।

आम्लिकां स्वेदयित्वा तु जलेन सह मर्दयेत् ।
तन्नीरे कृतसंस्कारे वटकान् मज्जयेत् कृती ।
अम्लिकावटकास्तेषु रुच्या वह्निप्रकोपनाः ॥[1]

अपि च —

चिञ्चातोये विमिश्रा गुडलवणयुता घ्नन्ति वै पित्तमेते
तृष्णामूर्च्छाभिघातज्वरजठरहराः क्षुद्ररोगापहाश्च ।
राजीचूर्णेन मिश्राः कफपवनहरा रोचका दीपनास्स्यु-
र्मन्दाग्निध्वंसकाश्चानिलविषशमना भुक्तमन्नं पचन्ति ॥

[2]अम्लिकाराजीवटकाः ।

माषाणां पिष्टिका हिङ्गुलवणार्द्रकसंयुताः ।
तथा विरचिता वस्त्रे वटिकास्साधुशोषिताः ॥
तलितास्तप्ततैले वा घृते वा सुप्रलोहिताः ।
वटकस्य गुणैर्युक्ता ज्ञातव्या रुचिदा भृशम् ॥

[3]माषवटी ।

कूश्माण्डार्द्रकमरिचैर्जीरकासिन्धूत्थमेथिकासहितैः ।
पिष्टैर्माषदलोत्थैर्विहिता वटकाश्च योगिभिर्भक्ष्याः ॥
कूश्माण्डकवटी ज्ञेया पूर्वोक्तवटिकागुणा ।
विशेषात्पित्तरक्तघ्नी लघ्वी च कथिता बुधैः ॥

तथा —

निस्तुषैर्मुद्गमाषैश्च कूश्माण्डमज्जसंयुतैः ।([4])
शुष्काश्च वटकाः पक्का रुच्यारोचकनाशनाः ॥

---

१ J1. adds the name: आम्लिकावटकाः ।

२. J1. राजीवटकाः ।

३. P1. P2. माषवटी । ओटवडीति नामान्तरम् ।

४. Bh. omits this verse.

अपि च —

आर्द्रकरामठसैन्धवजीरकयुक्कमठाकृतिकास्सतिलाः ।
अम्बुजबन्धुकरैः कठिनास्तिलतैलभृता रुचिदा वटकाः ॥

कोहलवडे ।

कूश्माण्डमज्जामिलितैस्सत्वग्बीजैस्सजीरकैः पटुभिः ।
शुष्काः करतलवटकाः शुद्धाङ्गारैर्विपाचिता लघवः ॥

आर्द्रकजीरकरामठधनिकाढ्याः श्लेष्मनाशना रुच्याः ॥

वींवडे ।

कृताश्च निम्बकुसुमैः सतिलैः पटुसंयुतैः ।
वटकाः कफपित्तघ्नाः कृमिव्रणविनाशिनः ॥

निम्बपुष्पवटकाः ।

रचिताश्च वज्रवल्या तिलरामठलवणजीरकैर्वटकाः ।
सृष्टपुरीषा रुच्या अर्शोघ्ना गुल्मवह्निमान्द्यहराः ॥

काण्डवेलीवडे ।

एवं सूरणवटकान् कुर्याद्विद्याच्च तद्गुणांस्तद्वत् ।

सूरणवडे ।

पक्वामलकफलानां पिष्टेन भृष्टतण्डुलैस्सतिलैः ।
चूर्णीकृतैस्सलवणैस्सहिङ्गुभिश्चन्द्रबिम्बसदृशैः ॥

लघवः कृतास्तु वटकाः पित्तं हरन्त्यपहरन्ति मेहं च ।
चक्षुष्या अतिरुच्या वृष्या दोषघ्नजाठराग्निकराः ॥

आवळवडे ।

कदलीकुसुमक्षोदैर्जीरकैस्तिलमिश्रितैः ।
मरीचक्षोदलवणैरेकध्यं वटकाः कृताः ।
तैलभृष्टा रुचिकराः पित्तला वातनाशनाः ॥

कदलीपुष्पवटकाः ।

---

१. T2. P1. P2. स्सजीरपटुभिश्च ।

शालिपिष्टदधिखण्डसंयुता दध्न एव वटका तथा कृता ।
घोरवातशमना रुचिप्रदा पित्तरोगमपहन्ति दारुणम् ॥

दधिवडे ।

मुद्गानां वटकास्तद्वद्दधिलास्याथितास्तथा ।
पथ्या रुच्यास्ततो लघ्व्यो मुद्गसूपगुणा स्मृताः ॥

तथा —

मुद्गजातास्तु ये केचिल्लघवो रुचिकारकाः[१] ।
दुर्जरा लघवो रुच्याश्चणकादिकृता वटाः ॥

मुद्गचणकादिवटी ।

माषपिष्टिकया लिप्तं नागवल्लीदलं महत ।
वस्तु संस्वेदयेद्युक्त्या स्थाल्यामास्तारकोपरि ॥
ततो निष्कास्य तं खण्डं ततस्तैले भर्जयेत् ।
अलीकामच्छ उक्तोऽयं प्र ारः पाकपण्डितैः ॥
तं वृन्ताकभरित्रेण वास्तुकेनापि भक्षयेत् ।
अलीकमच्छाश्शुष्का वा किं वा कथिकया युताः ॥
बृंहणा रोचना वृष्या बल्या वातगदापहाः ।
कोष्ठशुद्धिकरा युक्त्या किञ्चित्पित्तप्रकोपनाः ।
आर्दिते सहनुस्तम्भे विशेषेण हिताः स्मृताः ॥

अलीकमच्छाः ।

कथिका यथा—

स्थाल्यां घृते वा तैले वा हरिद्राहिङ्गु भर्जयेत् ।
अवलेहनसंयुक्तं तक्रं तत्रैव निक्षिपेत् ॥
एषा सिद्धासमरिचा कथिता कथिका बुधैः ।
कथिका पाचनी रुच्या लघ्वी वह्निप्रदायिनी[२] ।
कफानिलविबन्धघ्नी किञ्चित्पित्तप्रकोपिनी ॥

---

१. T2. P1. P2. मधुकारकाः ।
२. J1. वह्निप्रदीपनी ।

तथा—

मरीचं दीप्यकं शुण्ठी चव्यं चित्रकमेव च ।
पिप्पली पिप्पलीमूलं धान्यकाजाजिसैन्धवम् ॥

जरणं दाडिमं पथ्यमामलं हिङ्गुगन्धकम्[1] ।
एतत्कल्कं समं मिश्रं पक्त्वा तक्रं सपिण्डकम् ॥

वातश्लेष्महरा हृद्या परमा रुचिकारिणी ।
आमातीसारशूलघ्नी वातगुल्मनिकृन्तनी ॥

कासश्वासहरा चोग्रा मन्दाग्नेर्दीपनी परा ।
